अन्ये तु नटे रत्याद्यनुमानस्य रसत्वे तदनन्तरमेव स्यात् । तत्रापि प्रीतिव्युत्पत्त्योरविशेष इति चेन्न । [illegible] । स्मृतिविषयस्यांशे प्रमात्वेऽपि धर्मिणि [illegible] इति चेन्न । प्रमात्वस्योपपादयितुमशक्यत्वात् । अथ रत्याद्यनुमानानन्तरं रसोद्बोधस्तर्हि तत्र तेषामभाने रसोऽपि न स्यात् । 'अनुपहितस्य रसत्वे स्थायिविभावा[illegible] विरोधः स्थायिनिरूपणानुपपत्तिर्विभावानुसन्धानं [illegible] ।

वयन्तु अनुमीयमानस्य रसत्वे 'रसं साक्षात्करोमि' इत्यनुव्यवसायानुपपत्तिः । न च स भ्रमः । [illegible] प्रमात्वोपपत्तौ भ्रमत्वस्यानुचितत्वात् । [illegible] रसस्य चमत्कारानुपपत्तिश्चेति ब्रूमः ।

भट्टनायकस्तु—भावनोपनीतो रत्यादिः [illegible] कश्चिदानन्दरूपसाक्षात्कारविषयो रसः । [illegible]

(१) 'रसत्वेन' इति ख. पु. पाठः ।

त्पद्यते । उत्पत्तिर्हि रामादिनिष्ठत्वेन नटनिष्ठत्वेन स्वनिष्ठत्वेन वा ? नाद्यः । रामादीनामसन्निहितत्वात् । न द्वितीयः । नटे रत्यादीनामनुपलब्धिबाधात् । नापि तार्तीयीकः । सीतादीनां सामाजिकरतावकारणत्वात् स्वकान्तात्वसंवेदनाभावात् । आरा-ध्यत्वज्ञानस्य प्रतिबन्धकत्वाच्च । नापि प्रतीयते । प्रतीतिरपि हि न रामादिनिष्ठत्वेन न नटनिष्ठत्वेन संभवति । ताटस्थ्येन प्रतीतस्या-स्वादायोगात्, नात्मगतत्वेन । सा हि रामादिरत्यादीनामात्मरत्या-दीनामेव वा ? नाद्यः । भ्रमत्वप्रसङ्गात् । आस्वादस्य च प्रमात्वा-व्यभिचारात् । न द्वितीयः । सीतादीनां तदप्रत्यायकत्वात् । तथात्वे कामिताप्रसङ्गेन पापित्वप्रसङ्गाच्च । नाप्यभिव्यज्यते । अभिव्यक्तेः प्रतीत्यनतिरेकेण तत्पक्षोक्तदूषणगणग्रासात् । रसस्य प्रागसिद्धेरभिव्यक्त्ययोगाच्च । पूर्वसिद्धमेव हि घटादि प्रदीपादिना ऽभिव्यज्यते । अन्यथा ऽकार्यत्वापत्तेः ।

किञ्च व्यङ्ग्यव्यञ्जकयोः सहप्रतीतिरभिव्यक्तिः । पुस्तक-चित्रादौ तथादृष्टेः । न च रसस्थले तथासम्भवः । विभावादि-रसप्रतीत्योः कार्यकारणभावेन सहभावासम्भवात् । क्रमस्वी-काराच्च । तस्मादन्यैव भोगरूपा रसप्रतीतिरभ्युपेया ।

तथा हि—

त्रयस्तावत्काव्यव्यापाराः । अभिधा भावना भोगश्चेति । तत्र काव्यार्थपर्यन्ताऽभिधा । रत्यादिविषया भावना । सहृदय-विषयश्च भोग इति । भावना च विभावादिसाधारणीकरणात्मा भावकत्वाख्यः कश्चन वासनापरनामा संस्कारः । तेन च रामादिरत्यादिभिः सह सामाजिकरत्यादीनामभेदाध्यवसानम् ।

(१) 'आराध्यत्वज्ञानस्य' इत्यारभ्य 'नटनिष्ठत्वेन संभवति,' इत्यन्तः पाठो नोपलभ्यते ख. पुस्तके ।

वेन रामादिरत्यादीनां सामाजिकं प्रति [illegible] स्फुटत्वाभावात् [illegible]

त्काराख्यभोगानुपपत्तिरित्यपास्तम् । कामिनी भावना [illegible]

त्कारवदुपपत्तेः । भावकत्वञ्च समुचितगुणालङ्कारपरिग्रहात् [illegible] ।

अतएव कृताधिगमो लौकिकः शब्दो नोपयुज्यते, [illegible]

काव्यशब्दः । दृश्यते हि तदेव काव्यं मुहुर्मुहुः [illegible]

लोकैः । अतएव काव्यतदर्थपरामर्शाद्विवेचनमां भेदो न [illegible]

इति युक्तम् ।

तदुक्तम्—

स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः । इति ।

भावनासन्निहितस्य रत्यादेः साक्षात्कारात्मनो न [illegible]

गौरवमास्थेयमिति परमार्थः । ननु रामादिरत्यादीनां [illegible]

भावना न सम्भवति । तस्याः [illegible]

तद्रूपत्वादिति चेन्न । व्यञ्जनैव [illegible] । न [illegible]

किं भोगेनेति वाच्यम् । भोगोन्मुखत्वेन [illegible]

भावनोपक्षीणत्वाच्च । तस्माद्रजस्तमसी [illegible]

त्यात्मकात्मकाशफलकात्साक्षात्भिमतानुगुणविभावादि [illegible]

सि भावनोपनीतो रत्यादिः [illegible]

त्पायभासहेतुकसकलविघ्नविनिर्मुक्त [illegible]

दनभोगविश्रान्त्यादिविलक्षण [illegible]

पर्यवसितोऽर्थः ।

भोगपर्यन्तञ्च काव्यशब्दोऽपि [illegible]

साक्षात्कारवदिति । तथा च विभावादिभिः [illegible]

(१) 'सामाजिकमन्' इति [illegible]
(२) 'गुणविशेषात्' इत्यतः [illegible]
[illegible] पुस्तके नास्ति । (४) [illegible]
[illegible]

कसम्बन्धाद्रत्यादेः भाव्यमानस्य रसस्य सतो रसो यथा भवति तथा निष्पत्तिः पर्यवसानं विश्रान्तिर्भोगो भवतीति सूत्रार्थः। भुज्यमानो रस इति यावदिति मधभागा ।

अत्रेदं विमर्शनीयम्। किं रामादिनिष्ठो रत्यादिर्भोगगतामापन्नो रसः, उत सामाजिकनिष्ठः। नाद्यः। अप्रमात्वापातात्। किञ्च न तावाद्धवनानन्तरं भोगः। सन्निधापकाभावेन भोगायोगात्। भावनास्थितिकालावच्छेदेनैव भोग इति चेत्। सत्यम्। किन्तु भावना चर्वणोच्यते तदारूढस्यारसत्वे अलं भोगेन। अपि च रामादिरत्यादीनां अननुभूतानां न भावनासम्भवः। तस्याश्चिन्तासन्तानरूपत्वात्।

यत्तु व्यञ्जनया काव्यादेवाऽनुभव इत्युक्तम्, तदयुक्तम्। तथा सति भोगाऽनुपयोगात्। भोगौन्मुख्येन तत्र विश्रान्त्यसम्भव इति चेत्, न। तत्रैव विश्रान्तेरभिधातुं शक्यत्वेनाप्रयोजकत्वात्। नापि द्वितीयः। सामाजिकरत्यादीनां शब्दानुपादानेन भावनासम्भवादनुपनीतानां भावनानुपपत्तेः। सीतादीनां सामाजिकरत्यादिविभावत्वाद्यभावेन व्यञ्जनाया अप्यसम्भवात्। तदङ्गीकारे तु सैवाऽऽवर्त्तमाना भावना भवतु न परा। अथ भोग एव तत्पदेऽभिषिच्यते, तर्हि भोगोऽपि व्यञ्जनेति पर्यायः स्यादाश्रयतः फलतश्च तयोरविशेषात्। किञ्च सहृदयहृदयेषु वासनात्मनां रत्यादीनां सततसन्निहितत्वादलमतिरिक्तया भावनया। वासनैव भावनेति चेत्, तर्हि तज्जन्या प्रतीतिरेव भोग इति सिद्धान्तपक्षादविशेषात् न विवादः। यथाहुराचार्याः-प्रतीतिव्यतिरिक्तः संसारे को भोग इति न पक्षभेदः सिद्धान्तादिति।

अभिनवगुप्ताचार्यश्रीचरणास्तु-विभावानुभावव्यभिचारिव्यपदेश्यैः कारणकार्यसहकारिभिर्ललनोद्यानादिकटाक्षभुजोत्क्षेपादिचिन्तादिभिः सम्बन्धिविशेषस्वीकारपरिहारानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तो [illegible] परिणतिमुपनीतो न तु घटः प्रदीपेनेव पूर्वसिद्धः [illegible] वासनात्मतया सामाजिकानां मनसि निलीनो [illegible] ज्ञानाकारः सखण्डोऽप्यखण्डः [illegible] विश्वं स्वविलसितमिवोपदर्शयन् [illegible] विभावादिसमयसमनियतमात्मानमादर्शयन् [illegible] गम्योऽपि बाह्यविषयवदितरेन्द्रियविषयमिव [illegible] यन् हृदयमिव प्रविशन् परिमितोऽप्यपरिमितः [illegible] कभागपरमात्मसाक्षात्कारानन्दसुन्दरो [illegible] यः रसशृङ्गारादिपदवाच्योऽपि लौकिकालौकिक[illegible] तत्पदवाच्यो निर्विकल्पकसविकल्पक[illegible] हारगोचरोऽनिर्वचनीयरूपः [illegible] मात्रेणानेकतनुभिरर्जितभूयःसुकृत[illegible] नामधेयभाजा प्रमात्रा साधारण्येन [illegible] णतया पानकरसन्यायेन चर्व्यमाणः [illegible] रूपश्च लौकिकोऽप्यलौकिकचमत्कारकारी [illegible] तत्त्वमुपदर्शयामासुः ।

ननु कारणत्वादिपरिहारेण विभावादि[illegible] मिति चेन्न । सामाजिकव्यवहारस्यैव [illegible] । [illegible] त्वाऽसम्भवात् । अलौकिका[illegible]

(१ 'वर्ण' इति ख. पुस्तकेऽधिकम् । (२) [illegible] ३) [illegible] इति पुस्तके [illegible] ।

म्भवाच्च । विभावनादिव्यापारस्यावश्यकत्वाच्च । अन्यथा प्रतीतिलक्षणलौकिककार्यानिर्वाहात् । तेषां च विभावादीनां धारण्येन प्रतीतावनुभव एव प्रमाणमित्यावेदितं मम्मर्थविशेष- ादिना । तेन सामाजिकरत्याद्यभिव्यक्तौ रामादिरत्याद्यभि- व्यक्तिकारणेभ्यः सीतादिभ्योऽनुपपत्तेरिति परास्तम् । सीतात्वादि- पहाय स्त्रीत्वादिमात्रेणैव स्फुरणात् । अवस्थाविशेषाणामेव तथा ादानात् ।

तदाह धनञ्जयः—

धीरोदात्ताद्यवस्थानां रामाद्याः प्रतिपादकाः ।
विभावयन्ति रत्यादीन् स्वदन्ते रसिकस्य ते ॥ इति ।

वस्तुतस्तु स्त्रीत्वादिकमपि न स्फुरति । लोक एव तदपेक्ष- णात् । नन्वयुक्तमेतत्, पदार्थतावच्छेदकरूपेणैव पदार्थप्रत्ययौ- चित्यादिति चेन्न । दोषाभावगुणालङ्कारमाहिम्ना चर्वणाख्यायामु- त्तरप्रतीतौ तथानवगमाविरोधात् । अन्यथा काव्यनाटयेभ्यो हिता- हितव्युत्पत्तिरपि न स्यात् । तत्रापि हि तत्तदाचरणं तत्तादिष्टानिष्ट- साधनमिति रामादिसम्बन्धमपुरस्कृत्य मानसधीरुदेति । न हि वाक्यार्थबोधो रसोऽपि तु तदभ्युपायः । दृश्यते हि मृन्मयान् द्विरदान्पश्यतो डिम्भस्य मृन्मयादित्वं विशेषमपहाय द्विरदसा- मान्यप्रतिभासः । तथा च तत्तद्विशेषापुरस्कारेण धीरोदात्तादि- सामान्यप्रतिभासो न विरुद्धः ।

तदुक्तं धनिकेन—

क्रीडतां मृन्मयैर्यद्वद्बालानां द्विरदादिभिः ।
उत्साहः स्वदते तद्वत् श्रोतॄणामर्जुनादिभिः । इति मिश्राः ।

(१) 'मानसी' इति पृथक् पदं ख. पुस्तके ।

अत्रेदं चिन्त्यम्। स्त्रीत्वादिभानमात्रपक्षेऽपि, उत्तर[illegible] पदार्थप्रत्ययानुसारस्यैवोचितत्वात् [illegible] [illegible]दिभानस्याविरोधित्वात्। प्रत्युतोपयोगाच्च। यत्सान्[illegible] माचरितं रामादिभिरेवमाचरितं, तस्मादन्य[illegible] देवाचरितव्यं, अन्यपुंभिरपि रामादिवदेवाचरितव्यमिति [illegible] यमहायोनैव हि मानेसर्वोदेति। यच्च [illegible] दृष्टान्तः, स तु विपरीतः। [illegible]त्वादिविभागस्य [illegible]। तस्मा[illegible]भावत्वादिप्रकारेण भानमेव [illegible]। [illegible]त्वादिभानं पुनरास्तां नवेत्यन्यदेतदिति वयम्।

अभिव्यक्त एव च रत्यादिरसो, न तु [illegible] पूर्वसिद्धो रसोऽभिव्यज्यते। 'रसोऽभिव्यज्यते' इति [illegible] स्यात्यभिव्यक्तयुपचारात्।

तदुक्तं लोचनकारैः—

रसाः प्रतीयन्त इति प्रोदनं पच्यत इतिवद्व्यवहारः [illegible]। [illegible]भिव्यक्तिश्च समूहालम्बनात्मिका गुणभूत [illegible] प्रतीतिः। व्यङ्ग्यव्यञ्जकभावस्तु पश्चानुपपत्ति [illegible] योरिव सहप्रतीतावपि नानुपपन्नः।

ननु प्रागसिद्धः कथमभिव्यज्यत इति चेन्न। [illegible] वर्तमानत्वात्। अतएव वासनाया [illegible] मांसकादीनां रङ्गस्थितानामपि न रसास्वादः।

(१) 'कथं रामादिव[illegible]' [illegible] पाठः। ([illegible]) [illegible] प्र. पु. पाठः। (३) 'अर्थो[illegible]' [illegible] [illegible]त्वाच्च। अन्यथा' इत्यन्तः पाठो नास्ति [illegible]। ([illegible]) [illegible] इति [illegible] पु. पाठः। (५) '[illegible]' इति [illegible]। ([illegible]) [illegible] इति [illegible] पु. पाठः। (७) 'मानसं' इति [illegible] पुस्तके नास्ति।

तदुक्तं धर्मदत्तेन—

सवासनानां सभ्यानां रसस्यास्वादनं भवेत् ।

निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः । इति ।

अतएव च शान्तानां न शृङ्गाररसास्वादः, गाढरागिणा-
ञ्च न शान्तरसास्वाद इत्यादि व्यवस्था । तत्तद्वासनाया एव तदा-
स्वादप्रयोजकत्वात् ।

वासना चेदानीन्तनी प्राक्तनी च द्विविधाऽप्यास्वादहेतुः ।
तत्र यद्याद्या न स्यात् रागिणामपि केषांचिदास्वादादर्शनमनुपपन्नं
स्यात् । द्वितीया चेन्न स्यात् श्रोत्रियादीनामपि रसास्वादः
स्यादित्यावेदितमेवेति साम्प्रदायिकाः ।

वयन्तु—प्राक्तनी वासना तावदावश्यक्येव, यां विना
व्युत्पन्नानामपि न रसास्वादः । सैव च प्रतिभा, काव्यकारण-
मपि सैव । इदानीन्तनवासनाकल्पनायान्तु प्रमाणाभावः ।

यत्तूच्यते रागिणामपि केषाञ्चिदास्वादानुदयः किञ्चि-
द्विलम्बकृत इति—तत्रोच्यते व्युत्पत्तेरपि सहकारित्वात्तद्विलम्बकृत
इति । तथा च पूर्ववासनाव्युत्पत्तिसमाजादेव काव्यार्थसम्भेदे
रसास्वाद इति । यत्तु मुहुर्मुहुः काव्यपरामर्शेन तन्मयीभावे भावक-
त्वाऽपरनामा संस्कारएवेदानीन्तनी वासना, स चाऽऽवश्यक एवेति
तत्र नाऽस्माकं प्रद्वेषः । अनुभवदार्ढ्यात् संस्कारदार्ढ्यमनुसन्धान-
धाराधायकं कोवा नाऽङ्गीकुरुते, साधारण्येनैव तस्य हेतुत्वग्रहात् ।
प्रागुक्तवासनैव तु प्रतिभाऽपरनामधेया विलक्षणा काचिदियम-
पीत्यत्रपरममर्षः । संस्कारमात्रस्याऽङ्गीकारे तु सुहृदेवाऽसि न इति
ब्रूमः । वासनावशादेव विभावादिसाधारण्यभानं, वासनायां च
पूर्वसुकृतसम्भारएव हेतुः ।

(१) 'च' इति ख. पुस्तके नास्ति । (२) 'शृङ्गारास्वाद' इति पाठः ख. पुस्तके ।
(३) 'किंचिद्विलम्बकृत' इति ख. पु. पाठः ।

तदुक्तं—

पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्। इति।

नन्वलौकिकानां समुद्रलङ्घनादीनां कदाऽप्यननुभूतपूर्वतया अप्रसम्भवे कथं तादात्म्याऽभिमान इति चेत्। संसारस्याऽनादित्वात्कदाचिदनुभवसम्भवात्। तदाऽननुभवे [illegible] कल्पनात्। किञ्चोत्साहादिषु नानाविधः [illegible] विशेषकृतः। ततश्च [illegible]। ननु कारणादीनामेव यथासङ्ख्यं विभावादित्वात्कथं तेषां [illegible] कारणत्वमेवोच्यत इति चेत्, सत्यम्। [illegible] लौकिकविभावत्वादिरूपाणां तथाभावसम्भवात्। [illegible] यथाकार्यमुत्पादनात्। कथं तर्हि [illegible] हेतुत्वेन यौगपद्यासम्भवादिति चेत्, सत्यम्। [illegible] प्रतीतानां चर्वणाख्योत्तरप्रतीतौ [illegible]। [illegible] मधुरादिरसप्रतीतिवत्। तदुक्तम्—

यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम्।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः।
भावाभिनयसम्बद्धान् स्थायिभावांस्तथा बुधाः।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः। इति।

केवलस्य रत्यादेः [illegible] स्वयदर्शनात् [illegible] तटस्थानामेव [illegible] रत्यादयस्तद्विभावादयश्च [illegible] प्रतीतौ स्फुरन्त एव [illegible] देव नात्मयदर्शनात्।

स च रसो न कार्यः । विभावादिसमूहालम्बनात्मकत्वात् । त्वे तदनुपपत्तेः । न हि कारणज्ञानं कार्यज्ञानञ्च युगपद् यते । नाऽपि नित्यः । पूर्वमप्रतीतेः । ... थ्युपगमेऽपि रसत्वेन पूर्वस्थित्यनभ्युपगमात् । नाऽपि भवि- मत् । साक्षादानन्दमयप्रकाशरूपत्वात् । नाऽपि वर्तमानः । कार्यज्ञाप्यविलक्षणस्वभावत्वात् । किञ्च न तावदस्य निर्वि- कल्पकं ग्राहकं सम्भवति । विभावादिपरामर्शप्रधानत्वात् । परानन्दमयत्वाच्च । तस्य च निर्विकल्पकेनाऽग्रहणात् । नाऽपि सविकल्पकम् । अभिलापाद्ययोग्यत्वात् । सविकल्पकवेद्यानां हि वचनप्रयोगादियोग्यता । न चास्य तथात्वम् । किञ्च विशेषणज्ञानजन्यं हि सविकल्पकम् । विशेषणञ्चात्र चर्वणा, तस्याश्च ज्ञानदशां विना वैशिष्ट्यान्तराभावेन कस्य ग्रहणं स्यात् । विशिष्टस्य ग्राह्यस्याभावात् । न च ज्ञानविकल्पो 'घटं जानामि' इत्यादावाकारत्रयभानवद्भवितेति वाच्यम् । स्वरूपमात्र- भानाङ्गीकारात् । नाऽपि रसः परोक्षः । साक्षात्करोमीत्यनुव्य- वसायात् । मनोग्राह्यत्वमप्रमशास्त्रेऽभ्युपगमाच्च । नाऽप्यपरोक्षः, काव्यरूपशब्दान्वयव्यतिरेकानुविधानात् । तस्मान्न ज्ञाप्यः । किञ्च विभावादेः पूर्वं पश्चाद्वा प्रतीत्यभावाद्विभावादिचर्वणा- प्रतीतिघटितमूर्तिकत्वान्न ज्ञाप्यत्वम् । यदि च रत्यादिरूपे स्थितस्य रसरूपतया प्रकाश उच्यते, तदा न मतभेदः । न च रसव्यञ्जनाऽपि न स्यादिति साम्प्रतम् । इष्टापत्तेः । रसाधिष्ठान- रत्यादिव्यञ्जनायामेव रसव्यञ्जनात्वोपचारात् । अलक्ष्यक्रम- ध्वनिव्यवहारस्याऽपि तन्निबन्धनत्वात् । रसस्य तु चर्वणाविषय- तैव । ननु रसस्याऽकार्यत्वे भरतसूत्रे निष्पत्तिपदमनुपपन्नमिति

(१) 'निर्विकल्पकग्रहणासम्भवात्' इति ख. पु. पाठः । (२) 'ग्राह्यत्वाभावा' इति ख. पु. पाठः ।

वेद्य । चर्वणाया जन्यत्वेन तत्र जन्यत्वोपचारात् । यदि च केवलाद्विशेषणाद्विशेष्याच्च विशिष्टो भिन्न एव रस इति विशिष्टपदार्थान्तरवादिमतानुरोधेनोच्यते, तदा [illegible] मुख्ये अपि वक्तुं शक्येते । पर [illegible] इति तु । यदि तु रसनं रस इति विभावादिगोचरा चर्वणैव रसः ।

यदाहुः—आस्वादात्मानुभवो रस इति ।

शार्ङ्गदेवोऽपि—

> सुखरूपा स्वसंवेद्या संविदास्वादनाऽभिधा ।
> रसः स्यादथ वा स्थायी रस[illegible] । इति ।

तदाऽनुपपत्तिरेव नास्ति । पक्षद्वयेऽपि [illegible] वेति परमार्थः । केवलं विभावादीनां रस[illegible] त्वाभिप्रायेणोपचारप्रवादः ।

यत्तु प्रदीपकृत्प्रभृतिभिर्दर्पणकारा[illegible] — यद्यपि रसाऽनन्यतया चर्वणाऽपि न कार्या, तथापि [illegible] तत्कार्यतामुपपाद्य [illegible] वेऽपि तथा [illegible] इति । तत्र [illegible] स्याऽकार्यत्वस्य [illegible] । न च [illegible] कार्यत्वे रसस्यैव कार्यत्वं [illegible] । [illegible] तानुसारेणोपपन्नत्वात् । [illegible] प्रोत्पत्तिनिर्वाहित्व[illegible] मपत्संवेदन[illegible] पादेन । [illegible] रेव दुर्ज्ञेयाः ।

---

(1) [illegible]

तस्मादिदमत्र तत्त्वम्, विरुद्धरूपकार्यकारणानुमानादि-
विलक्षणानिर्वचनीयरूपो रसः। प्रमाणमत्र च चर्वणैवेति ।

ननु हेतुत्वं कारकज्ञापकान्यतरत्वव्याप्तम् । तच्च विभावा-
दिज्ञानान्निवर्त्तमानं स्वव्याप्यं हेतुत्वमपि निवर्तयतीति चेत्, न ।
अनुभवसिद्धस्याऽन्यत्राऽदृष्टिमात्रेणाऽपलापाऽशक्तेः । पानक-
रसस्याऽप्यपलापप्रसङ्गात् ।

तथा चाहुः—

क्वेदमन्यत्र दृष्टमित्यहो निपुणता तव ।

दृष्टान्तं याचसे यत्त्वं प्रत्यक्षेऽप्यनुमानवत् । इति ।

तस्मादनन्यथासिद्धानुभवबलादस्मिन्नेव प्रकारान्तरमादाय
हेतुत्वं पर्यवस्यतीति बोध्यम्। एतेन यदाधुनिकेनाऽऽलङ्कारिकम्मन्ये-
न गङ्गाधरेणोक्तम्-उत्पत्तिज्ञप्तिभिन्नचर्वणानुपपत्तेः रसस्य क्षणि-
कोल्लासमात्रतया तुच्छत्वप्रसङ्गः, तथा च सत्यर्थक्रियाकारित्वं न स्यात्।
तस्माच्चर्वणाप्रतिबन्धतिरोधानद्वारेण शास्त्रस्य ज्ञापकत्वाभि-
व्यञ्जकत्वं रसविभावादीनाम् । तथा च विभावादिपरामर्शो न
चर्वणा । आवरणविघाते स्वसंवेदनीयसुखरूपरसप्रतिबिम्बोद्ग्रहण-
समर्था चर्वणावृत्तिरुत्पद्यते इति चर्वणाद्वारा विभावादीनां कार्यो
ज्ञाप्यश्च रस इति वदामः ।

एतेन सविकल्पकनिर्विकल्पकाभ्यां रसग्रहणे दोषात्परस्परप्र-
तिक्षेपे परस्परात्मकत्वतदभावात्मकत्वाऽन्यतरापत्त्या ग्राहकविधा-
वपि रसस्य लोकोत्तरत्वमपि निरस्तम्। उक्तयुक्त्या सविकल्पकेन
रसग्रहणसम्भवात् । न चैवं रस एव विषयविशेषस्फूर्तिप्रसङ्गः
निर्विषये रसे विषयेणाकारासमर्पणात् । वैषयिके तु सुखे विष-
येणाऽऽकारसमर्पणाद्विषयस्फूर्तिरिति ।

तदिदमविवेचितसिद्धान्ततत्त्वस्याभिधानमिति ध्येयम् । ए
सति लोकोत्तरत्वहानिप्रसङ्गात् । चर्वणापदार्थनिरूपणाच्च

किञ्च चर्वणाया रसाऽनन्यतया तद्द्वारा कार्यत्वज्ञाप्यत्वा-धानं हृदयशून्यतामेवाऽऽवेदयति व्याख्यातृभारतस्य भेदवर्णनात् अपि च चर्वणायाः कार्यत्वज्ञाप्यत्वाभ्युपगमेऽन्यतरेऽपि तद्द्वारा कार्यत्वज्ञाप्यत्वे अभिमन्तुं शक्येते । तस्मात्तदङ्गी-कारे स्वस्मिन्कक्षानिक्षेपापत्तिः । रसस्य तद्द्वारा कार्यत्वज्ञाप्यत्वो-पपादनानुपयोगश्च । तत्कार्यत्वज्ञाप्यत्वाभ्यामेव व्यवहारसिद्धेः । भेदाभेदयोः सर्वमतेऽप्यावश्यकत्वात् । तस्माच्चर्वणाद्वारा रसः कार्यो ज्ञाप्यश्चेति मतापपातम् । अभिव्यक्तिपक्षं तु निरस्तमेव । विस्तरेण चैतन्मतमलङ्कारसर्वस्वे निरस्तमस्माभि[illegible] ।

वयं तु—न कारणादीनामेव विभावादित्वं, नापि रत्यादीनामेव रसत्वं, किन्तु [illegible] वशात्तन्मयीभावेन ये नायिका[illegible]हृदयवर्तिनो [illegible] तदाकारसुन्दराश्चित्तवृत्तिविशेषा आपन्ने [illegible] विभावा-दिकमलौकिकं रूपं भजन्ते, तदनु च [illegible] विलक्षणा चित्तवृत्तिर्जायते इति [illegible] रसो न [illegible] । एव भरतसूत्रे [illegible] । [illegible] वा लौकिक[illegible] । [illegible] च [illegible] । [illegible] सुलभमेव । [illegible]

[illegible]—

[illegible] ।

[illegible] ॥

(1) [illegible]

[illegible]

केवलं स्थाय्यभिव्यक्तौ हेतुत्वेनैव संमतैः ।
वासनावशतः सत्त्वसमुद्रेकान्निरावित्ते ॥
वासनात्मतया पूर्वं सामाजिकहृदि स्थितः ।
साधारणतया भातैः कारणादिभिरेव यः ॥
रत्यादिर्व्यज्यते स्थायी रसः सोऽस्मन्मते मतः ।
वासनोद्बोधकं चाऽत्र काव्यनाट्याऽनुभावनम् ।
सोऽयं रसः स्वप्रकाशसुखात्मकधिया यया ।
गृह्यते चर्वणा सैव कार्या सैव च संमता ॥
विभावा अनुभावाश्च सञ्चारिस्थायिनौ तथा ।
गुणप्रधानभावेन चर्व्यमाणा रसात्मताम् ॥
यान्ति पानकवत्तेन प्रमाणमिह सा मता ।
विरुद्धरूपसम्भेदादैकरूप्यं परानुदत् ॥
अलौकिकः परब्रह्मसंवेदनसहोदरः ।
रसोऽयमिह संवित्तेरन्यन्मानमपार्थकम् ॥
वस्तुतस्तु न रत्यादौ रसत्वं कारणादि च ।
विभावत्वादितामेति किं तु तन्मयभावतः ॥
सामाजिकानां जायन्ते ये तदाकारसुन्दराः ।
चित्तवृत्तिविशेषास्ते विभावत्वाद्यलौकिकम् ॥
रूपं भजन्ते तदनु सकलाकारसुन्दरा ।
एका विलक्षणा चित्तवृत्तिर्या जायते सताम् ॥
रसनात्मा रसः सैव शङ्काशूकनिवारिता ।
इति ब्रूमो वयं त्वत्र तदिदं मत्सरं विना ॥
विचारणीयं रसिकैरिति सर्वं समञ्जसम् ।
इदं सिद्धान्तसर्वस्वमलङ्काररहस्यके ॥

विस्तरेण मया सम्यग् विवेचितमनुक्रमात् ।
तत एवाऽवगन्तव्यमित्यलं बहुजल्पनैः ॥

स्थायिलक्षणं तु—

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।

आत्मभावं नयत्यन्यान्स स्थायी लवणाकरः । इति धनिकेनोक्तम् ।

ते च—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ।
इति नाट्ये ऽष्टौ ।
त एव शमसंयुताः काव्ये स्युः स्थायिसंज्ञिताः ।

इति काव्ये नवैव विवेचितं मया अलङ्कारादर्शे । [illegible] च विरोधाऽविरोधचिन्ता [illegible] [illegible] निराकरणं च तत्रैव द्रष्टव्यम् ।

रसाश्च—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ।

इति नाट्येऽष्टौ । शान्तोऽपि नवमो रसः [illegible] काव्ये । एते विभावानुभाव[illegible] [illegible] [illegible] [illegible] [illegible] दोषाः । [illegible] अलङ्कारादर्शे विवेचितम् ।

(१) [illegible]

यत्तु

रसे सारश्चमत्कारः सर्वत्राऽप्यनुभूयते ।
तच्चमत्कारसारत्वे सर्वत्राऽप्यद्भुतो रसः ।
अतस्तत्वद्भुतमेवाह कृती नारायणो रसम् ।

इति नारायणेनाऽद्भुत एव रस इत्यभिहितम् । धर्मदत्तादिभिश्च तदेवानुसृतम् । तन्न साधु । चेतसः परस्याऽनुभवासिद्धत्वात् । प्रकृतिभेदाच्च । नाऽपि व्यभिचारिषु स्थायिन इव रत्यादिषु विस्मयानुगमः । शोकादिषु तथाऽननुभवात् । लौकिके रसे नियमतस्तद्विभावादेरनुपनिपातात् काव्यादौ च तथानुपनिबन्धात् ।

अथ प्रतीयते तावत्सर्वत्र चमत्कारः सचाद्भुत एव, तस्यैव रत्यादिविभावानुरोधेन व्यपदेशान्तरमिति । तत्र तर्हि विस्मयानुरोधेनाऽद्भुतव्यपदेश[1] इत्यपि सुवचत्वात् । अन्यथा तदुक्तिरहिणामपि तदास्वादप्रसङ्गात् ।

अथ पृथगेवाऽयमद्भुतः सर्वैरेव रसभेदाभिमतैर्जन्येत, जन्यतां स तु न रसः । किन्तु तद्धेतुः स्थायी अलौकिकचमत्कारीत्यभियुक्तव्यवहारात् । तस्य तथापरिभाषणे तु नाऽस्माकमपचयो न युष्माकमुपचय इति संक्षेपः । विस्तरस्तु मदुन्नीताऽलङ्काररहस्ये ध्येयः । एतेषां प्रत्येकमुदाहरणादि च तत्रैव द्रष्टव्यमिति शिवम् ।

इति श्रीमद्विन्दुवृन्दारकवृन्दपुन्दर जगद्गुरु महामहोपाध्याय
भट्टमाधवतनूजनि प्रभाकरोन्नीते रसप्रदीपे
रसविवेको नाम द्वितीयालोकः समाप्तः ॥

---

१ विस्मयानुरोधेऽद्भुतव्यपदेशः-इति ख, पु, पाठः ।

एवं रसं निरूप्य रसः कया वृत्त्या काव्यान्वयीत्यत्र [illegible] वृत्त्यन्तरनिरासेन व्यञ्जनां स्थापयितुं वृत्तीः [illegible] — यत्र रसस्वास्वादकाव्यात्प्रतीयत इति [illegible]। अतस्तत्र वृत्तिरन्वीक्षणीया। [illegible] ऽतिप्रसङ्गात्। तत्र न तावद्भ्रमादिशेषणे ऽभिधा [illegible] सङ्केताभावात्। किञ्च विभावादिज्ञानमन्तरा [illegible] शक्यत्वात् पदान्तरस्य नाऽभावादेन [illegible]। न हि विभावाद्यभिधानमेव तद्विधानं [illegible] ऽभ्युपगमात्। प्रत्युत स्वशब्दाभिधाने रसदोषाङ्गीकार इति। यत्राऽपि 'शृङ्गाररूपोपनय[illegible]' इत्यादौ शृङ्गारादिपदोपादानं, तत्राऽपि विभावादि[illegible] रसप्रतीतिर्न तु रसशृङ्गारादिपदात् इति न [illegible]।

अभिधामूला[illegible] [illegible] [illegible] यत्तु कैश्चिदुक्तं 'सोऽयमिषोरिव [illegible]' इति यथाऽन्यैरप्यभिहितम्।

तात्पर्यार्थोऽपि केषु [illegible]।

[illegible]

ननु [illegible], [illegible] [illegible]त्वात्। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] त्वात्।

[illegible]

किंचैवं 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति भवत्सिद्धान्तसर्वस्वमप्यत्र दूरभूष्टं भवेत्। दीर्घदीर्घाभिधाव्यापारेणैव प्रत्यायकत्वे श्रुतेरेव सर्वत्र बोधकत्वसम्भवात्। तुल्यबलत्वस्यैव युक्तत्वात्।

यत्तु कैश्चिदुच्यते 'पौरुषेयमपौरुषेयं वा सर्वं वाक्यं कार्यपरमेव, अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवदुपेक्षणीयत्वापत्तेः'। ततश्च काव्यशब्दानामपि निरतिशयानन्दास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रयोजनान्तरानुपलब्धेर्निरतिशयसुखास्वाद एव तत्कार्यत्वेनाऽवधार्यते तत्र च शब्दव्यापार आवश्यकः, 'यत्परः शब्दः स शब्दार्थः' इति न्यायादिति। तत्र प्रष्टव्यं किमिदं तत्परत्वम्, तदर्थत्वं वा तात्पर्यवृत्त्या तद्बोधकत्वं वा? आद्ये न विवादः। व्यङ्ग्यत्वेऽपि तदर्थतानपायात्। द्वितीये तु केयं तात्पर्याख्या वृत्तिः? अभिहितान्वयवादिभिरङ्गीकृता तदन्या वा? आद्ये दत्तमेवोत्तरम्। द्वितीये त्वतिरिक्तवृत्त्यङ्गीकारान्नाममात्रे विवादे पर्यवसानम्।

ननु युगपदेव तात्पर्यशक्त्या विभावादिसंसर्गात्मकस्य रसादेः प्रकाशनं भवत्विति चेन्न। तयोर्हेतुफलभावाङ्गीकारात्। सहभावे च सव्येतरविषाणवत्तदसम्भवात्। किञ्च बोद्धादिभेदादपि व्यङ्ग्यबोधने ऽभिधा न व्याप्रियते। तथा हि-वाच्योऽर्थः सङ्केतज्ञानमात्रशालिभिरवगम्यते व्यङ्ग्यस्तु सहृदयैरेवेति बोद्धृभेदः। 'भ्रम धम्मिअ' इत्यादौ विधिनिषेधरूपतया, 'निःशेषच्युत' इत्यादौ च निषेधविधिरूपतया स्वरूपभेदः। 'गतोऽस्तमर्कः' इत्यादौ च वाच्यार्थ एक एव, व्यङ्ग्यस्तु तत्तत्प्रतिपत्त्रादिभेदात् कान्तमभिसरेति, गावो निरुध्यन्तामिति, नायकस्याऽयमागमनावसर इति,

सन्तापोऽधुना नास्तीति, निकेतनस्तुनि [illegible], [illegible] होत्रहोमादिकमनुष्ठीयतामिति, दूरं पान्थ इत्यादिरूपत[illegible] इति संख्याभेदः। वाच्यार्थः शब्दोच्चारणमात्र[illegible] [illegible] तथाविधप्रतिभादिनैर्मल्यादिनेति निमित्तभेदः। [illegible] व्यङ्ग्यस्तु प्रतीतमात्रचमत्कारकारीति कार्यभेदः। वाच्यः केवलप्रतीतिको, व्यङ्ग्यस्तु चमत्कारादिनिमित्तक इति प्रतीतिभेदः, पूर्वपश्चाद्भावेन च कालभेदः, वाच्यः शब्दाश्रयः, व्यङ्ग्यस्तु शब्द-तदेकदेशतदर्थवाक्यपदवर्णरचनादि[illegible] थाश्रय इत्याश्रयभेदः।

> कस्स व ण होइ रोसो दट्ठूण पिआइ सव्वणं अहरं।
> सभमरपद्मग्घाइणि वारिअवामे सहसु एण्हिं॥

इत्यादौ च प्रतीतकान्तादिगतत्वेन [illegible] भेदः। [illegible] ऽभिधा। रसनात्मकव्यापार[illegible] द्रसाभावाच्च न तथाऽभिधा। [illegible] धया बोध्यते। अत एव न लक्षणाऽपि। [illegible] रूपार्थबाधादिरूपाभावाच्च।

न हि 'मुख्यं बाधयुतं [illegible]' इत्यादौ [illegible]। न च तद्योगः। [illegible]। [illegible] प्रयोजनं, रसस्य [illegible]। [illegible] च प्रयोजनस्याऽपि [illegible]। [illegible] लक्षणा, [illegible]। [illegible]

ननु 'मुख्यं बाधयुतम्' [illegible] दिवानरसङ्गतो [illegible]

१ [illegible]

तन्निर्वाहश्च लक्षणया । तथा हि—चुम्बनालिङ्गनादिचेष्टानां रत्यादिभिः सहाऽविनाभावो दृष्टः, ते च चुम्बनादयः काव्येऽभिधीयमाना रत्यादिकं लक्षयन्ति 'अभिधेयाविनाभूतप्रवृत्तिर्लक्षणोच्यते' इति वचनात् । लक्षितश्च रत्यादिर्वाक्यार्थः प्राधान्येन बोध्यत्वात् । यथाह धनिकः—

वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया ।
वाक्यार्थः कारकैर्युक्तः स्थायीभावस्तथेतरैः ॥ इति ।

इतरैर्विभावादिभिः । लक्षणानभिमानस्तु मुख्यार्थानवधारणात् । किञ्चाऽस्ति मुख्यान्वयसम्भवेऽपि लक्षणा 'यष्टीः प्रवेशय' इत्यादौ प्रकरणादिना यष्टिमत्प्रवेशतात्पर्ये निर्णीते तदनुपपत्त्या सेति चेत् इतोऽपि दीयतां दृष्टिः । प्रमाणान्तरात्र धृतरसप्रत्यायनतात्पर्यानुपपत्त्या विभावादिवाचकपदानां तत्र लक्षणेति सुवचत्वात् ।

अथोच्यते—लक्षणा तावत् द्विविधा, अर्थान्तरसङ्क्रमितवाच्या अत्यन्ततिरस्कृतवाच्या च । तत्र न तावदाद्या, यत्र हि मुख्यार्थः स्वेन रूपेणाऽनुपयोगबाधितो रूपान्तरेणाऽन्वेति तत्रार्थान्तरसङ्क्रमः । यथा 'रामोऽस्मि सर्वं सहे' इति । अत्र हि रामत्वमात्रमेवाकाङ्क्षितं वक्तृत्वेनैव तल्लाभात् । अतो राज्यपरित्यागवनवासादिधर्मसहस्रविशिष्टो धर्मी लक्ष्यते, धर्माश्च प्रत्येकमनन्तत्वात् लक्षयितुमशक्याः । न चाऽत्र विभावादयोऽनुपयुक्ताः, नाऽपि रूपान्तरेण गम्यन्तेऽपि तु स्वरूपेणेति कथमर्थान्तरसङ्क्रमः स्यात् । न वा विभावादयो न प्रतीयन्ते रसाप्रतीतिप्रसङ्गात् । तस्यास्तत्समूहालम्बनरूपत्वात् । अतो नाऽत्यन्ततिरस्कृतवाच्यता । अतो न लक्षणा इति ।

तत्र । 'गङ्गायां घोषः' इत्यादौ मुख्यत्यागेन लाक्षणिकप्रयोगे प्रयोजनाऽन्वेषणाया अयुक्तत्वात् । अत्र तु रत्यादौ न मुख्यप्रयोगः इति किमनयेति चेत्, अत्रोच्यते—यत्तावदुक्तं विभावादिवाचकपदैः स्वार्थाविनाभूतत्वात् लक्षितो रत्यादिर्वाक्यार्थ इति, तदयुक्तम् । विभावादिवाचकपदानां स्वार्थबाधाद्यभावात् लक्षकपदाभावात्, अपदार्थस्य चावाक्यार्थत्वात् ।

यदप्यत्रोक्तं मुख्यार्थान्वयेऽपि तात्पर्यानुपपत्त्या 'यष्टीः' इत्यादौ लक्षणा दृष्टेति, तत्रोच्यते—न तावद्विभावादिसंबद्धो रत्यादिर्लक्ष्यते संसर्गस्य लक्षणाफलत्वात् । यथाऽऽहुः—

वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः ।
तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥ इति ।

अथ केवलो रत्यादिर्लक्ष्यते, तत्र [illegible] । अथ वाक्यार्थ एवाऽर्थान्तरसंक्रमितवाच्यत्वेन [illegible] । तर्हि न पुनरन्वयः, [illegible] । यदप्यभिहितमायुष्मता—'अथ [illegible] किं प्रयोजनान्वेषणेनेति । तथा । [illegible] । [illegible] मुख्यप्रयोगे चमत्काराभावेन [illegible] विशदपदता इति, तदपि न । [illegible] न सर्वेषां [illegible] ।

[illegible]

[illegible]

हि प्रतीयमाना आस्वादपदवीमुपेतास्ते रसा इत्युच्यन्ते इत्यवश्यं-भावी तत्प्रतीतिक्रमः। केवलमाशुभावितयाऽसौ न लक्ष्यते यतोऽयमद्याप्यनभिव्यक्तक्रमः इति व्यक्तिविवेककारः।

अत्रोच्यते—किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमित-रागादिज्ञानमेव रसत्वेनाभिमतं, उत तद्भावनया भावकैर्भाव्यमानः स्वप्रकाशानन्दो वा? आद्ये नो विवादः। किं तु रामादिरागादि-प्रतीतिर्न रसत्वेनाभ्युपगम्यतेऽस्माभिः। द्वितीयस्तु व्याप्तिग्रहणा-भावाद्धेतोराभासतया च नानुमानगम्यः।

ननु यत्र यत्र विभावाद्यभिधानं तदभिनयो वा, तत्र तत्र शृङ्गारादिरसाविर्भावः, इति सुग्रहैव व्याप्तिः पक्षधर्मता च। अथोच्येत अनुमाने हेतुमात्रापेक्षा अत्र तु वक्त्रादिवैशिष्ट्यमपेक्ष्यताम् 'न ह्यतिपृथुलं जलकुम्भ'मित्यादौ कुलवधूक्तार्थविशेषाव-गमः। न वा वक्त्रादिवैशिष्ट्यावगमे प्रतिभावतां व्याप्त्याद्यनुस-न्धानावलम्बेन प्रतीतिर्व्यङ्ग्यस्य विलम्बः (?) इति, तत्र अनुमान-पक्षेऽपि हेतूपस्थितौ तदुपयोगात्। विशिष्टस्यैव लिङ्गत्वात्। पदाद्य-र्थानुपस्थितिरिति चेत् न। प्रमाणान्तरावगतस्यापि विशेषस्य भू-माद्यविवापेक्षितत्वात्। अत एवाहुः—

याऽर्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम्।
सैवानुमानपक्षे नो गमकत्वेन संमता॥ इति।

किञ्च अभिधामूलव्यङ्ग्येऽभिधयैव व्यङ्ग्यप्रतीतिसिद्धे-र्निरर्थिका वृत्त्यन्तरकल्पना। न च प्रकरणादिनैकार्थे तन्नियन्त्रणान्न तत्र तस्या व्यापार इति वाच्यम्। तात्पर्यस्यावश्यकत्वात्। अन्यथा तादृशकाव्यार्थे कवीनां पदविशेषणान्वेषणं न स्यात्। न च 'युगपद्बोधकत्वं सकृदुच्चरितस्य ने'तिनियमान्नार्थद्वयस्य युगपत्प्रतीतिः।

प्रतीतिक्रमे तु विरम्य व्यापार इति वाच्यम्। सकृदुच्चरितोऽपि सति तात्पर्ये युगपदनेकार्थबोधसंभवात्। अत एव ध्वनिकृता—

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य।
यस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत्॥

इत्यादिश्लोकः श्लेषोदाहरणत्वेन दर्शितः। ननु तत्राप्यनेकार्थबोधनसामर्थ्येऽक्षादिपदे प्रकरणादिनियमवदत्रापि तथा स्यादिति चेत्, न। तात्पर्यस्यावश्यकत्वादित्यादिपूर्वमेव दत्तोत्तरत्वात्। भवतु वाऽभिधाया अबोधकत्वमिह, तथाप्येकपदवाच्यत्वसम्बन्धेन लक्षणानुमानं वा भवेत्। न त्वदृष्टचरवृत्तिकल्पना। अपि च

भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ तेण।
गोलाणईकच्छकुडंगवासिणा दरिअसीहेण।

इत्यादौ, 'उल्लास्य कालकरवालमहाम्बुवाह'मित्यादौ च सर्वत्र वाच्यानुपपन्नं तावन्न प्रतीयते। तत्र बोधकोऽर्थो लिङ्गं, बोध्योऽर्थश्च लिङ्गी। बोधकस्य चार्थस्य पक्षसत्त्वं तावदभिमतमेव। सपक्षसत्त्वविपक्षव्यावृत्ती अभिमते अपि सामर्थ्यादवसीयेते इति त्रिरूपाल्लिङ्गाल्लिङ्गिज्ञानमनुमानमेव। व्यञ्जनमपि बोधकमिति नातिरिक्तव्यञ्जनकल्पने मानम्।

अत्र वदामः—यत्तावदभिहितं यत्र यत्र विभावादयोऽभिधीयन्ते तत्र तत्र रसप्रतीतिरिति सुग्रहा व्याप्तिः पक्षधर्मता चेति, तन्न विरुद्धम्। न वयमिदं प्रतीतिकारणानामाधिक्यमनुमन्यामहे। किन्तु स्वप्रकाशमात्रविश्रान्तः परमानन्दानन्दनिर्भरः। तेनात्र लिङ्गा-

यच्चोक्तं-'याऽर्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम्' । इत्यादि तदप्ययुक्तम् । विप्रावादिभिः सह प्रतीतेरनुमानाऽसम्भवाच्च । यथाऽऽह धनिकः—स्वरूपं प्रकाशयन्नेव परार्थभासनो व्यञ्जक इत्यादि, ज्ञातस्यार्थस्य व्यञ्जकत्वात्कथमेवमिति चेत्, न, व्यङ्ग्यज्ञानकाले व्यञ्जकज्ञानानुवर्त्तनात् । अत्र सम्बन्धज्ञानापेक्षणात् । न चातिप्रसङ्गः, प्रतिभाद्युपायेव तदुद्गमात् । नन्वत्रापि न सहप्रतीतिरव्यवधाना वासनादिवशात्तु तथा भ्रम इति चेत्, न, बाधकमन्तरेण तत्कल्पनायोगात् । तदुक्तं वाचस्पतिमिश्रैः ।

प्रीयमानपरित्यागो बाधके नाऽसति स्फुटः । इति ।

नन्वदृष्टचरवृत्तिकल्पनागौरवमेव बाधकम् । तदुक्तं तैरेव—दृष्टात्कार्योपपत्तौ च नाऽदृष्टपरिकल्पनेति चेत्सहप्रतीतिबलेन तत्कल्प्यते फलमुखत्वाद्गौरवस्य । किंचाऽनुमितावेवगौरवम्, अप्रंविदित व्याप्त्यादिकल्पनात् । सम्बन्धस्य बोधकत्वं तावल्लक्षणास्थलेऽभिमतमेवेतीहाऽपि स एवाज्ञातो बोधयतीति लाघवम् । न च तत्कल्पकमपि, फलस्यान्यथासिद्धेः । अपि चाऽनुमानं परार्थमेव स्यात् । शब्दरूपत्वात् । तत्र च साध्यसाधननिर्देशनियमः । न चात्र तथा साध्यानुपादानात् । यद्यप्यभिधामूलव्यङ्ग्यस्थलेऽभिधैवेतरार्थबोधनक्षमेति प्रोक्तं तदप्ययुक्तम् । तस्याः प्रकरणादिनियन्त्रितत्वात् । यच्चोक्तमपरार्थेऽपि तात्पर्यमावश्यकमपरथा पदविशेषान्वेषणमफलं स्यादिति, तत्रोच्यते-क्रमिकार्थबोध एव तात्पर्यात् युगपद्बोधस्तावदनुपपन्नः । क्रमे तु विरम्य व्यापार प्रसङ्गः । यद्वाऽभिहितमभिधाया अभावेऽपि लक्षणानुमानं वा स्यादिति तदनुपपन्नम् । मुख्यार्थबाधाद्यभावात् । तात्पर्यानुपपत्तिरस्त्यैवेति चेत्, मैवम् । तदज्ञानेपि सहृदयानामपरार्थबोधात् ।

किञ्च द्वितीयार्धे यद्यप्यभिधालक्षणे तथापि [illegible] ऽवश्यं स्वीकार्यम्। वृत्त्यन्तरादेव तत्प्रतीतिसिद्धौ [illegible] धालक्षणमकारकल्पनया। तस्मान्न तत्रापि। [illegible] निरस्तम्।

यदप्यपरमुक्तमसम्बद्धं तावत्र सर्वत्र [illegible] सर्वत्र व्यङ्ग्यावगमतत्पत्तत्वादाविति तत्रविवस्तरनिर्वत, [illegible] शलम्। हेतूनामाभासत्वात्।

तथा हि—'भम धम्मिअ' इत्यादौ [illegible] विहितं भ्रमणं गोदावरीतीरे [illegible] मापयतीति वक्तव्यं, तत्राऽनैकान्तिको हेतुः। भीरोरपि गुरोः [illegible] देशेन प्रियानुरागादिना वा गमनसम्भवात्। पुंश्चल्यास्तत्र [illegible] नवेति सन्देहात्सन्दिग्धासिद्धश्च। 'उद्धात्य कस्य' इत्यादौ [illegible] न नीरदतुल्य इति व्याप्त्यभावः सर्वत्राभावात्। [illegible] विपर्यबोधकः एवंविधार्थत्वात् यथेदं तथेदं [illegible] मेयमनुमानम्। किञ्चैवंविधत्वस्यानैकान्तिकत्वात् [illegible] व्याप्तिर्नास्त्या। तत्र च स्थले स्थले [illegible] हे प्रतिवेशिनी'त्यादौ न ग्रन्थिस्तनतिलकनेत्राधिकत्वादेर्दर्शने [illegible] तस्याः परकामुकोपभोगस्य लिङ्गमिति [illegible] पतिस्नेहेनापि भवतीत्यनैकान्तिकम्। 'निःशेषच्युतचन्दनं [illegible] यदि चात्रैव स्नानकार्यत्वेनोपात्तानां चन्दनच्यवनादीनां [illegible] कान्त्यात्तदनुमापकत्वं न सम्भवति।

किञ्च प्रतिपाद्यदूत्यादेस्तदनुमाने [illegible] नाऽऽप्तः। तत्प्रतीतिस्तत्राभावात्। न [illegible] विधाभिप्रायस्थगनस्थले व्यभिचारात्। [illegible] स्वाभिप्रायात्। किञ्चैवंविधानां [illegible]

प्रामाण्यानावश्यकत्वात्सर्वत्र संदिग्धासिद्धत्वं हेतोः। व्यक्तिवादिना ऽधमपदसहायानामेवैषां व्यञ्जकत्वमुक्तम्।

न च तत्कान्तस्य अधमत्वं प्रामाणिकमिति निश्चयस्तत्कथमनुमानम्? न चास्त्वनुमानाभासः, आभासताज्ञाने तदनुदयात्। सहृदयानामिहाभासता न स्फुरत्येवेति नियम इति चेत्, न। नियमस्य वाङ्मात्रत्वात्। वस्तुतस्तु व्याप्त्याद्यनुसन्धाननियमाभावान्नाऽनुमानं, तत्कल्पने त्वप्रामाणिकं गौरवमित्यसंविदितव्याप्त्यादिकल्पना स्यात्। सम्बन्धस्य बोधकत्वे तावत् लक्षणास्थले ऽभिमतमेवेतीहापि स एवाज्ञातो बोधयतीति लाघवम्। तत्कल्पने त्वप्रामाणिकं गौरवमित्यावेदितमनन्तरमेवाचार्यैः स्यात्। प्रयोजनस्थले च गङ्गाधर्मस्य तटे बाधादपि नानुमितिः। न च प्रतीयमानेष्वेकमवच्छेदकं, येन रूपेण व्यापकमानं भवेत्। न च तावता विशेषाणामेकदाऽनुसन्धानसम्भवः, येन समूहालम्बनानुमितिः स्यात्। व्यञ्जनायां पुनरनिश्चितविशेषाणामनेकेषां पानकरसन्यायेन प्रतीतिरिति नानुपपत्तिः। एतेनार्थापत्तिरपि प्रत्युक्ता। तस्या अपि प्राक्सिद्धव्याप्तिच्छायोपजीवनेन प्रवृत्तिः। यथा यो जीवन् स कुत्राऽप्यवतिष्ठते जीवति च गृहे विद्यमानश्चैत्र इति।

श्रीपादस्तु 'भ्रम धम्मिअ' इत्यादौ भिक्षुं प्रत्येवं वदन्त्याः प्रतिवेशिनं प्रति निःशङ्कताभिधानं स्फुरति। किञ्च गोदाकुञ्जस्य रतस्थानत्वं व्यज्यते। सिंहस्थानत्वबुद्ध्या परेण गन्तव्यमेव न। सिंहस्तु वस्तुगत्या नास्त्येव। तदेतद्व्यञ्जनां विना लब्धव्यमिति शङ्कैव नास्तीत्याह।

संस्कारजन्यत्वाद्रसादिधीः स्मृतिरिति केचित्। तदनुभवविरोधादुपेक्षणीयम्। वयं तु वर्णतद्गतसौकुमार्यादिविशेषरचनाविशेषचेष्टादीनां व्यञ्जनयैव तावदर्थविशेषबोधकत्वं

वाच्य, स [illegible]नुपानानंगात् । [illegible] किंच [illegible] शब्दादप्यधिजेयवर्णा [illegible] दिवसोऽ[illegible] [illegible] योऽर्थस्य भवितुमर्हति कदाचित् [illegible] [illegible] तति: । सर्वथा [illegible] इति निर्विकल्पोऽयमिति स्पष्ट: । [illegible] रहस्ये यथायिद्विधुपरिगम [illegible] इति निरवम् ॥

श्रीमत्पुरारिपुरभेदनतत्पर:

श्रीरामचन्द्रपदवारिजवन्दनोत्सुक: ।

श्रीविश्वनाथगिरिपदभक्तिमान्

श्रीमान् प्रभाकर इदं [illegible] ॥ १ ॥

भवतु कृतिरियं विदग्धु-

परिहृदयाद्भवमोजमोदरीना ~

कठिनतिमिरभूमिपरिपूरे-

सदयपदु: मनोरथोविपान ॥ २ ॥

ज्योतिःशास्त्रमुखीय १६४०

गणिते शराब्धिं ।

पूर्वोत्तरिनवसंग

[illegible] कृतो मया ॥ ३ ॥

दीपावल्यां तिथौ [illegible] ।

तिलकं तु [illegible] ॥ ४ ॥

इति श्रीमद्विन्दु[illegible]

[illegible]

भट्टप्रभाकररचिते [illegible]

नाम [illegible] ॥ १ ॥

[illegible] ।

No. 10(Part I)–The Siddhāntaratna, by Baladeva Vidyābhusaṇa.
Ed. with a Prefatory Note by Gopināth Kavirāj, M.A.

No. 11–The Śrī Vidyā Ratna Sūtras, by Gauḍapāda, with a Commentary by Śankarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa Śāstri Khiste Sāhityāchārya.

No. 12–The Rasapradīpa, by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa Śastrī Khiste Sāhityāchārya.

No. 13–The Siddhasiddānata Sangraha, by Balabhadra.
Ed. with Introduction by Gopināth Kavirāj, M. A.

No. 14–The Triveṇikā, by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha Śarmā Sāhityopādhyāya, M. A. and Jagannātha Śāstrī Hoshing Sāhityopādhyāya.

No. 15–(Part I)–The Tripurārahasya.
Ed. with a Prefatory Note by Gopināth Kavirāj, M.A.

No. 16–The Kāvya Vilāsa, by Chirañjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha Śarmā Sāhityopādhyāya, M. A. and Jagannātha Śāstrī Hoshing Sāhityopādhyāya.

No. 17–The Nyāya Kalikā, by Bhaṭṭa Jayanta.
Ed. with Introduction by M. M. Gangānāth Jhā, M. A., D. Litt.

No. 18 (Part I)–The Gorakṣa Siddhānta Sangraha.
Ed. with a Prefatory Note by Gopināth Kavirāj, M.A.



(e) Naiṣadha and S'rī Harṣa by Nīlakamala Bhaṭṭâchārya.
(f) Indian Dramaturgy, by P. N. Pāṭaṇakar.

Vol. IV—

(a) Studies In Hindu Law (4) : Judicial Procedure: by Gaṅgānātha Jhā.
(b) History and Bibliography of Nyāya Vaiśeṣika Literature. by Gopināth Kavirāj.
(c) Analysis of the Contents of the Ṛgveda Prātiśākhya, by Maṅgala Deva Sāstrī.
(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedī.
(e) Food and Drink in the Rāmāyaṇic Age, by Manmatha nātha Roy.
(f) Satkāryavāda: Causality in Sāṅkhya, by Gopintāh Kavirāj.
(g) Discipline by Consequences, by G. L. Sinha.
(h) History of the origin and expansion of the Aryans by A. C. Ganguly.
(i) Punishments in Ancient Indian Schools by G. L. Sinha.

To be had of—

The Superintendent, Government Press,
Allahabad, U.P. (India).